Chap-7

# सप्तमपरिच्छेदाः

## य-रससिद्धान्तस्यभारतीयतथापाश्चात्यमनोविज्ञानदृष्ट्या विवेचनम्--

भारतीयकाव्यशास्त्रस्य अपेक्षया पाश्चात्यकाव्यशास्त्रे भावाः न्यूनेन वर्णिताः सन्ति। प्राचीनेष्वाचार्येषु केवलमरस्तूरेवास्यां दिशि किञ्चित्कार्यमकार्षीत्। स्वकाव्यशास्त्रग्रन्थेऽत्रासदीतत्वानि वर्णयतो विचारप्रसंगे तेनोल्लिखितम्—यावद्विचारविषयकः प्रश्नः, तत्र वयं ता एव स्थापनाः स्वीकर्तुमर्हाः, या मया भाषणशास्त्रे प्रस्तुताः। भाषणशास्त्रस्य च

काव्ये कोऽस्ति सार इत्येतस्य तथ्यस्य विचिकित्सायां केचिदाचार्या अलंकारान्, केचिद् रसम्, केचिद् ध्वनिं, केचिद् भणितिभंगिविशेषं, केचिच्चरीतिं सर्वोपजीव्यं तत्वमंगीकुर्वतेस्म। साहित्यशास्त्रेतिहासो निर्दिष्टस्य विवरणस्य समुपस्थापनात् प्राक् अस्माकं पुरो मुनिं भरतमुपश्लोकयति। स

मुनिः-'विभावानुभावसञ्चारिसंयोगाद्रसनिष्पत्तिः'1 इत्येतेन सूत्रेण रससम्बन्धिनीं यां सामग्रीं प्रास्तावीत् सा साहित्यानुरागिणः पर्यतुतुषत्।

भामह-दण्डिरूद्रटोद्भटप्रभृतयोऽलंकारवादिनो भवन्तोऽपि रसात् स्वां दृष्टिं स्रंसयन्तो न प्राप्यन्ते। अनेनैव प्रकारेण रीतिवादी वामनो वक्रोक्तिवादी कुन्तको ध्वनिवादी च आचार्य आनन्दवर्धनस्तत्र रसो स्वकीयां श्रद्धां प्रकटीकुर्वन्तः

प्रेक्ष्यन्ते।रसानुभूतिकाले दृष्टद्रष्टव्यस्य योगिनः स्थितिमिव सहृदयः परिगृह्णाति स तदनुभवानेहसि किं वा तदास्वादनसमये कोऽहं क्वाहमित्येतदपि सर्वं विस्मरति। अतस्तत्वज्ञा रसस्य सद्भावादेव काचित् कृतिः कवेः काव्यमिति संज्ञामधियातुं शक्नुते इत्येतं निश्चयं हि अयासिषुः। ते स्वरचिते काव्य लक्षणे रसं प्राधान्येन सन्निवेशयन्तिस्म। तत्र आचार्यमम्मटः काव्यस्य लक्षणमिदं प्रस्तवीति—

तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि'।2

पण्डितराजजगन्नाथः किं नाम काव्यमित्यत्र ब्रूते—

'रमणीयार्थप्रतिपादकः शब्दः काव्यम्'3आचार्य विश्वनाथोऽत्र शंसति—

'वाक्यं रसात्मकं काव्यम्'4एतेषां काव्यलक्षणानां अन्यैः प्राचीनैराचार्यैः किं वा विद्वद्भिर्निरूपितानां काव्यलक्षणानां वा व्याख्या अधःस्थितेषु शब्देषु प्रस्तूयते— काव्ये सुन्दरमनोरञ्जनकारिणो भावा भवेयुः।सुव्यवस्थितायां काव्योचितायां भाषायां वैचित्र्येण चमत्कारचारुरीत्या च भावानामभिव्यञ्जनं स्यात्।पदावली मधुरा

मृदुला हृद्या च भवेत्। मञ्जुलानां हि शब्दानां यच्चयनं स्यात् तत्र सर्वविधतया स्पष्टता, सार्थकता, स्वाभाविकता, सुबोधकारिता चापेक्ष्यन्ते। कल्पनायां हृदयावर्जनशीलता, मनःपवित्रीकरणपटुता,

चित्रोपमता च स्युः। स्वाभाविकतयैव सह मानसिकभावानां मनोवृत्तीनां च

व्यापकं यथार्थं पेशलं च चित्रणं भवेत्। मानवजीवनस्य किं वा तदीयानां व्यापाराणां विशदया व्यञ्जनयैव साकं युगपदेव गूढगम्भीरोदग्रविचाराणामपि

सामञ्जस्यं स्यात्। वर्णनं स्याद् वरेण्यं बन्धुरकमयुक्तं सजीवमूर्तम्। मधुरसंगीतात्मकच्छन्दश्छटाच्छुरितता विद्योतेत। कलासु काव्यकलायाः सर्वोत्तमत्वात् तामधिकृत्य 'कलासीमा काव्यम्' इत्येषां भणितिः सुविदितास्ति सर्वेषामपि साहित्यसेविनाम्। वस्तुन द्वितीयमभागेद्वितीयाथेकविंशपरिच्छेदान्तं तेन वक्तृत्वकलासन्दर्भेऽनेकेषां मनोवेगानां क्रमेण सूक्ष्मं वर्णनमुपन्यस्तम्। एते मनोवेगाः सन्ति—क्रोधशान्ती, प्रेयोवैरे, भयविश्वासौ, लज्जा वैयात्ये, अनुग्रहनिग्रहौ करूणामन्यू, असूयास्पर्धे च। अस्यक्रमस्याधारो मनोवैज्ञानिकः, अत्र हि मिथोविपरीतभावयुग्मानि युगपदुपवर्णितानि,। क्रोधविपरीता शान्तिः, स्नेहविरपीतं वैरम्, भयविपरीतो विश्वासः, करूणाविपरीतश्च मन्युरस्ति। प्रतीच्या प्राच्या च परम्परा ज्ञापयति यद् रसस्य विवेचनं परमपुरातनकालादेवारब्धमभूत्। प्लेटो तं भ्रान्तिमयं सुखमिति मन्यते। यतो हि तद्विचारेण कला सनातनसत्तायाः एका क्षीणा छायैव। एरिस्टोटलस्तु इयमनुकृतेरानन्द इति वदति। कलाकृतिं सः प्रकृतेः स्थायिनां रूपाणामनुकृतिरिति स्वीकुरूते। प्लेटो-अरस्तुदार्शनिकयोः सिद्धान्तमाधारीकृत्य रसस्य मीमांसा समजायत। नवयुगारम्भे नूतना आधारा अपि मार्जिता अभूवन्। रसस्य भारतीया मीमांसा व्यवस्थितरूपेण भरतादारब्धाजायत परं तन्मूलं बीजं वा वेदेषु वर्तते। वेद-रचयिता परमेश्वरः कविरिति वेदेषु प्रोक्तः। अतः वेदः स्वयं काव्यरूपं बिभर्ति। तत्र काव्यस्य सम्पूर्ण सौन्दर्यमुपलभ्यते। एतस्मादेव हेतोः काव्यसौन्दर्यनिरुपके साहित्यशास्त्रे काव्यसौन्दर्यस्याधायकानां येषां गुणरीतिध्वन्यलंकारादितत्वानां विवेचनं कृतमस्ति तानि सर्वाण्यपि मूलतत्वानि वेदेषु लभ्यानि भवन्ति। तत्र माधुर्यौजः प्रसाददिगुणानामुदाहरणानि स्थानेष्वनेकेषु दृश्यन्ते। गणाधार एव रीतीनां निर्धारणं भवति। अतः रीतिसम्बन्धिनामुदाहरणानामपि दर्शनं तत्र भवति।

विरोधाभासस्य, उपमायाः, उत्प्रेक्षायाश्च कियन्मनोहरं सुन्दरञ्च उदाहरणमयं मन्त्रः।

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।

तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति।।5

अत्र मन्त्रेदर्शनस्य मौलिकतत्वानि तु प्रतिपादितान्येव परं साहित्यशास्त्रस्य दृष्ट्यापि परमसुन्दरमुदाहरणं वर्तते। काव्यस्य मनोहरभाषायां दार्शनिकतत्वस्येदृशं

रमणीयं निरूपणं समग्रेऽपि साहित्ये क्वचिदेव लब्धं भवेत्। किञ्चैतस्मिन् मन्त्रे रूपक-विभावानुप्रास विशेषोक्त्यलंकाराः राजन्ते। 'सयुजा', 'सखाय' इत्येताभ्यां पदाभ्यां जीवात्मपरमात्मनो र्नित्यतायाः सच्चिद्रूपतायाश्चाभिव्यक्तिरपि जायते, अतस्ते पदे ध्वनिं द्योतयस्तस्मान्मन्त्रो ध्वनेरपि मनोज्ञं निदर्शनम्। एतादृशः शतशो मन्त्राः श्रुतिषु प्राप्ताः भवन्ति येषु साहित्यशास्त्रस्य मूलतत्वानां समीचीनतया समावेशः सञ्जातोऽस्ति।

अस्मद्राष्ट्रस्य चिन्तका रसं ब्रह्मास्वादसहोदरं मत्वा आध्यात्मिकरूपपर्यन्तं तं विधाय प्रदर्शयाञ्चक्रुः। तत्सुखस्य च तुलनां समाधिसुखेन सह अकार्षुः। रसस्य मनोविज्ञानदृष्ट्या या मीमांसा जाता सास्मद्देशस्यैव सम्पत्। भरतकृता संकल्पना एतस्या मीमांसायाः मूलस्रोतः। रसश्चित्तस्यैव रूपत्वेन मतोऽभूत्।

तथाहि– रसश्चित्तविद्रुतिः, चित्तदीप्तिः, चित्तस्य विस्तारो वा। परं एषां वर्णनं यथा मयाधुनैव संकेतितं वक्तृत्वकलासन्दर्भे कृतमस्ति। याऽरस्तूसमये यवनदेशे व्यक्तेः सर्वमुख्यः सामाजिकोऽलंकार आसीत्। अतः स्वभावतोऽमी सामाजिका भावाः सन्ति, न वैयक्तिकाः। यथा व्यक्तिगतां रतिं विहायारस्तूः प्रेयसः (मित्रस्नेहस्य) क्रोधानन्तरं च सामाजिकभावनानुरूपस्य मन्योः, असूयातिरिक्तायाः स्पर्धायाश्च पृथग् वर्णनं प्रस्तौति। वैयक्तिकस्य शोकस्य स्थानं सामाजिकयोर्लज्जाकरुणयोः प्राधान्यं स्थापयति। तथाप्येतेषु क्रोधभयघृणाप्रेयःकरुणा भारतीयरसशास्त्रीयभावैरतिसमाना एव सन्ति। शान्तेर्वृत्तञ्च क्रोधपर्यन्तसीमिततया सङ्कीर्णमपि शमबीजानां तत्र विद्यमानतया विस्तीर्णम्। अनुग्रहस्पर्धयोश्च स्पष्टान्युत्साहबीजानि। विस्मयहासयोरेव केवलयोरत्र नास्ति, चर्चा, कदाचिदरस्तूध्यानमेतादृशेषु केन्द्रितमस्ति, ये व्यक्तित्वमुत्कर्षयन्ति। परमयोगिनोऽनुभवस्य साक्षात्कारः स्वगतो भवति। तस्माद्धेतोः सः परेषामनुभवस्य विषयः एव न भवितुं शक्यः। परं रसात्मकोऽनुभवः सर्वेष्वपि सामाजिकेषु समानभावेन समवतिष्ठते। अतस्तत्सम्बन्धे नेदं वक्तुं सुशक्यं यत् तदनु भवे कीदृश्यपि बाधा वर्तते। रसानु भवस्येयं साधारणीकृता स्थितिस्तं स्वात्मगतानु भवात् पृथक् करोति। द्वितीयस्याञ्च भूम्यां रसानुभूतौ सामाजिकस्याभ्यन्तरो बोधः सम्मिलितः, तस्मात् परानुभवविषये या तटस्थता अस्पष्टता च प्रतिलक्ष्यते सापि न सम्भवा। एषोऽनुभवः सामाजिकस्याभ्यन्तरानुभवे समाहितो जायते, अतः स तं सम्पृक्ततया निर्बाधमास्वदते। तदनन्तरं रसप्रक्रियायां यस्य विभावादेः संयोजनं भवति, तेन साधारणीकरणस्थित्यां सामाजिकस्य स्थायिन्या वासनाया रूपं दधाना रत्यादिभावाः उद्बुध्यन्ते। तदैव च अनुभावेन तेषां विघ्नानां सम्भावना नावशिष्यते, येषां चर्चा सविस्तरमुपरि कृतास्ति। अलौकिकत्वमुद्दिश्य मूले प्रोक्तम्—

"अत्र तु स्वात्मैकगतत्वनियमासम्भवात्, स्वानु प्रवेशात् परगतत्वनियमाभावात्, तद्विभावादिसाधारण्यवशसम्प्रबुद्धोचितनिजरत्यादि- वासनावेशवशाच्च न विघ्नान्तरादीनां सम्भावना प्रवर्तते। अत एव विभावादयो न निष्पत्तिहेतवो रसस्य। तद्बोधापगमेऽपि रससम्भव- प्रसङ्गात्। नापि ज्ञप्तिहेतवो येन अस्ति चात्रोक्तभावविवेचनान्तर्गततया हासविस्मयोरपि प्रासंगिकं कथनम्, स्वतन्त्रविवेचनन्तु कारणवशान्नोपन्यस्तम्।

अरस्तूकृतं मनोवेगविवेचनमपि व्यवस्थितं क्रमबद्धं चास्ति। तत्र च प्रायोऽनुगमविधिरवलम्बितः। सर्वतः प्रथमं मनोवेगानां परिभाषा प्रस्तुता-'मनोवेगा इति ते भावा अभिप्रेयन्ते, ये मानवनिर्णयं प्रभावयन्ति येषाञ्चानुभूतिः सुखात्मिका दुःखात्मिका वा भवति। ते च मनोवेगाः क्रोधकरुणाभयादयस्तेषां च विपरीता भावाः।' प्रतिमनोवेगवर्णनाय वस्तुत्रयं ज्ञातुमपेक्षितम्—मनोवेगविशेषेणानुभवितुर्मनः स्थितिः, तदुद्रेकहेतुकव्यक्तिपरिस्थितयः, तादृशभावोद्रेककारणानि चेति। एषु प्रथमं मनोवेगस्वरूपेण, द्वितीयतृतीययोश्चालम्बनोद्दीपनविभावाभ्यां सम्बध्येते। अग्रे च यत्रैषां मनोवेगानां प्रत्यक्षवर्णनमस्ति, तत्र प्रायेणाश्रयस्य क्वचित्क्वचिच्चानुभावानामपि विवरणं प्राप्यते। अस्मिन्प्रकरणे भारतीयाचार्यैः अरस्त्वा च प्रस्तुतानां कतिपयेषां प्रमुखमनोवेगानां विवरणं तुलनात्मकदृष्ट्या रोचकं स्यात्—अथापरः प्रश्नःसमाधीयते।स्थायिभावानां स्थितिर्जीवनमूलमनोवेगस्थितेरभिन्ना, ईदृशस्य च विभाजनस्य कश्चिद्वस्तुसूक्ष्माधारोऽप्यस्ति यो नामनोवैज्ञानिक इति स्वीकारे प्रश्नान्तरमेकमुपतिष्ठते यत् किं नाम जीवनस्य मूलमनोवेगा नवैव सन्ति, उतन्यूनाधिका इति। प्रश्नोऽयं संस्कृतसाहित्यशास्त्रे नैकधोत्थितः। तत्र स्थायिभावानां वृद्धिह्रासयोरपि प्रयत्नो जातः, तेषां प्राधान्याप्राधान्ये अपि विचारिते। तान् सर्वांश्चैकस्मिन्मूलभावेऽन्तर्भावयितुमति प्रयासः समादृतः। परमन्ते परिणामोऽयमेव निर्गतो यथा स्थूलतया स्थायिभावानां संङ्ख्या नवैवास्तीति। नवैव च भवेदिति।

भरतेन मूलतोऽष्टावेव रसा अष्टावेव च स्थायिभावा निरूपिताः। तेष्वपि रत्युत्साहक्रोधजुगुप्सानां प्राधान्यं मौलिकत्वं हासशोकभयविस्मयानामप्राधान्यं व्युत्पन्नत्वं च सिद्धान्तितम्। भरतानुसारेण रतेहासः, उत्साहस्य विस्मयः, क्रोधस्य शोकः, जुगुप्सायाश्च भयमुत्पद्यते। परमिदं मतं क्रमादग्राह्यतां गतम्। अनन्तरञ्च शमोऽपि समावेशितः, स्थायिभावानां प्रामाणिकी सङ्ख्या च नवैव स्थिरीभूता। तथापि शोधनक्रमः प्राचलदेव, अनेके च नवीनाः स्थायिभावा अप्युद्भावयन्त। रुद्रटः स्नेहं, भोजो मतिगर्वहर्षान्, विश्वनाथो वत्सलभावं, भानुदत्तो मिथ्याज्ञानस्पृहे रूपगोस्वामिप्रभृतयो वैष्णवाचार्याश्च भगवद्रतिं स्थायिभावत्वेनोद्भावयामासुः। एतदतिरिक्ता अन्येऽप्यनेके स्थायिभावाः संस्कृतकाव्यशास्त्रेऽभ्युल्लिखिताः। यथा—अभिनवगुप्तेन पूर्ववर्तिनः कस्यचिदाचार्यस्याभिमतो गर्धोऽयुक्तविषयतृष्णापरपर्यायोऽपि स्थायिभावत्वेनोल्लिखितः।

रामचन्द्रगुणचन्द्राभ्यामासक्त्यरतिसन्तोषाणाम्, डाक्टरराघवेण च जैनानुयोगद्वारसूत्रोल्लिखितायाः व्रीडायाः स्थायिभावत्वं संकेतितम्। वस्तुतः संस्कृतकाव्यशास्त्राचार्येषु प्रारम्भादेव स्थायिभावसङ्ख्याविषये मतभेदः प्रवर्ततेस्म। अभिनवसंकेतैश्च स्पष्टमिदं यल्लोल्लटादयः कतिपये विद्वांसः स्थायिभावानामियत्तां—नवसङ्ख्यासीमां न मन्यन्ते स्म। तथाहि—

'तेनानन्त्येऽपि पार्षद प्रसिद्धया एतावतां प्रयोज्यत्वमिति

यद् भट्टलोल्लटेन निरूपितं तदवलेपेनापरामृश्येत्यलम्।'

अन्ततो बहुमतं भरतपक्षे स्थितम्, एतासाञ्च तथोक्तानामुद्भावनानां किमपि महत्वं नादीयत। अस्मिन्विषयेऽपि विषयान्तरवदभिनवगुप्तस्य मतमेव प्रायो मान्यतां गतम्। येन स्थायिभावानामियत्तां निर्धारयता स्पष्टमुद्घुष्टमासीत्—

'स्थायित्वं चैतावतामेव। जात एव हि जन्तुरियतीभिरेव संविद्भिः परीतो भवति। तथाहि 'दुःखसंश्लेषविद्वेषी सुखास्वादनसादरः।' इतिन्यायेन सर्वो रिरंसया व्याप्तः। स्वात्मन्युत्कर्षमानितया, परमुपहसन्, अभीष्टवियोगसन्तप्तः, तद्धेतुषु कोपपरवशः, अशक्तौ, च ततो भीरुः, किञ्चिदर्जिजिषुरपि, अनुचितवस्तुविषयवैमुख्यात्मताकान्तः, किञ्चिदनभीष्टतयाभिमन्यमानः, तत्तत्स्वपरकर्तव्यदर्शनसमुदितविस्मयः, किञ्चिच्च जिहासुरेव जायते।'इति। (अन्तिमेन विशेषणेन निर्वेदस्य स्थायिभावत्वमपि सूचितम्)।

स्वमतं चाधिकं स्पष्टयताऽभिनवेन भूयोऽप्युक्तम्—

आर्द्रतास्थायिकः स्नेहो रस इति त्वसत्। स्नेहो ह्यभिषंगः, स च सर्वोमत्युसम्बद्धाः वावेवं पर्यवस्यति। गर्धस्थायिकस्य लौल्यरसस्य प्रत्याख्याने सरणिर्मन्तव्या। एवं भक्तावपि वाच्यमिति। (भक्तिरसोऽपि पृथङ् न मन्तव्यः, तस्यापि रतौ वा भावे वान्तर्भावसम्भवादित्यर्थः)

अयं प्रवचनाशयो यत्संस्कृतकाव्यशास्त्रे सामान्येन नवानामेव स्थायिभावानां मान्यत्वमतिष्ठत्—रतिहासशोकक्रोधभयोत्साहजुगुप्साविस्मयनिर्वेदानाम्। अतदतिरिक्तौ च द्वावेव भावौ काञ्चित्सीमां यावत् स्थायित्वस्याधिकारिणौ निरपयेताम्—वत्सलभावो भगवद्रतिश्च। शेषा एतेष्वेवान्तर्भाविताः, सञ्चारिणां वा कोटौ निवेशिताः।

परमेतासां सम्बन्धः शारीरिकक्रियाभिः सहाधिकोऽस्ति। अत एवासां सहकारी मनोविकारो मनःस्थितिर्वा नातिस्पष्टा नापि विशिष्टा भवति। इमा नूनं नास्माकं विशेषेणोपयोगिन्यः। उक्तेषु चतुर्दशसु प्रवृत्तिमूलकेषु मनोविकारेष्वपि क्षुधा सर्वथा शारीरिकी प्रवृत्तिरस्ति। अत एव काव्ये तदुपयोगविशेषाशा व्यर्थैव। तदतिरिक्ता अतशिष्टास्त्रयोदशापि नाव्याप्त्यतिव्याप्तिनिर्मुक्ता इति भवन्तः पश्यन्तु। ते स्पष्टतया मिथः सीमारेखामतिक्रामन्ति। यथा सर्जनोत्साहाधिकारभावने अहंकारपरिधावायातः। अर्तिदैन्ये अपि मिथो नातिभिन्ने। वस्तुतस्ते एकस्या एव प्रवृत्तेद्वे अभिव्यक्ती स्तः। इत्थं पाश्चात्यमनोविज्ञानानुसारेणापि प्रवृत्तिमूलका

मनोविकाराः साधारणतया दशैव भवन्ति-रतिहासक्रोधभयजुगुप्सौत्सुक्यवात्सल्याहंकारार्तिसहानुभूतयः। एषु प्रथमे सप्त संस्कृतोक्तस्थायिभावेभ्यः प्रायो न भिद्यन्ते। अहंकारोत्साहयोरपि कश्चिदन्तर विशेषो नास्ति। वात्सल्यमपि कैश्चिदाचार्यैः स्थायिभावतया स्वीकृतम्। यद्यपि सर्वतन्त्रसम्मत्या तस्याप्यतिरिक्ता न स्थितिः। इदमेव सहानुभूतिविषयेऽपि सातिशयनिश्चयं वाच्यम्। अथ संस्कृतसाहित्यशास्त्रस्यैकः स्थायिभावः शोको नाम विचार्यते। किमार्तिसहानुभूती इत्युभे शोकस्य करुणस्य वा तत्वे न मन्तव्ये।

अद्यतनं मनोविज्ञानं मैक्डूनलाद्दूरमग्रेसृतम्। मूलवृत्तीनां वर्गीकरणेसङ्ख्याने चापि भूयसी परिवृत्तिजतित्यत्र नास्ति सन्देहा। यत्र मैक्डूनः लस्याधारो मूलतः केवलं जीवविद्यामासीत्, तत्राद्यावचेतनशास्त्रजीवविज्ञानयोराधारेण मूलवृत्तयो मनोवेगादयश्च विवेच्यन्ते। यथा—रनल्डफ्लेचरेण स्वकीये 'इन्सटिन्क्ट इन मैन' नाम्नि ग्रन्थे या तालिका प्रास्तूयत, तस्यां मानसिकवृत्तीरपेक्ष्य शारीरिकवृत्तीनां संख्या भूयस्यस्ति, फ्लेचरेण पञ्चसु शीर्षकेषु मूलवृत्तीनां वर्गीकरणं प्रस्तुतम्। शरीरवैज्ञानिकाधारः, मानसिकानुभवः, मानसिकी प्रवृत्तिः, उद्दीपनकारणम् परिणामिनी शारीरिकी प्रवृत्तिरिति एषु मानसिकोऽनुभव इति प्रायो मनोवेगानां पर्यायः। मानसिकी प्रवृत्तिरित्यान्तरिकानुभावेषु, शारीरिकी प्रवृत्तिरिति बाह्यानुभावेषु सन्निहिता, उद्दीपनकारणे विभावे सन्निहितम्। अत्र केवलानां दशमूलवृत्तीनामुल्लेखः। एतां वास्तविकवृत्तयो मूलवेगा वेत्युच्यन्ते। एतदतिरिक्ता सामान्यास्तिस्रः प्रवृत्तयोऽहंप्रवृत्तयो वा सन्ति द्वौ च गौणावेगौ। प्रथमे वर्गे दशभ्यो मूलप्रवृत्तिभ्यः षट् शारीरिक्यः—श्वसनम्,भोजनम्, पानम्, तापरक्षणम् स्वापः, शरीरसुखैषणा, उत्सर्जनञ्च। केवलास्तिस्रो मासिक्यः—(कामकेलि-कामजन्यद्वेषवात्सल्य—गार्हस्थ्यवृत्तयः) अपरस्मिन्वर्गेऽहंप्रवृत्तीनां त्रयो भेदाः सुखदुःखे, रागविरागौ, प्रवृत्तिनिवृत्ती चेति। तृतीये च वर्गे गौणावेगस्य द्वयोर्भेदयोरुल्लेखः—कुण्ठा निराशा वा, आज्ञाकाङ्क्षे।

अनपेक्षितकथनमिदम्—यद्बलाबलयोरयं भेदश्चेतनापेक्षया शरीरस्य वर्धमानं महत्वं द्योतयति, अस्माकमियं धारणास्ति यदिदं परिवर्तनं न संशोधनपर्यायम्। अयं भेदो गतिं द्योतयति नतु प्रगतिम्। मैक्डूनलादीनां मध्यवर्तिनां मनोवैज्ञानिकानां स्थापनापेक्षयाऽत्याधुनिकानुसन्धानानीमानि मान्यतां गमिष्यन्तीति दुर्वचम्। तथापि यावन्मनोवेगानां सम्बन्धोऽस्ति, उपर्युक्तालिकायास्तिसृणां मानसिकमूलवृत्तीनामन्तर्गततयाऽप्यनेकस्थायिभावानां स्थितिर्यथावद् ग्राह्यास्ति—भयम्, उत्साहः, कौतूहलम् रतिः, वात्सल्यम्, क्रोधश्च। हासस्त्यक्तः, सामान्यस्फूर्तेः क्रीडाभेदे वा तस्याप्यन्तर्भावोऽभवत्। शोकस्य ग्रहणं द्वितीयस्मिन् वर्गे अहंप्रवृत्तीनामनतर्गतस्य दुःखस्यान्तः कर्तुं शक्यते। एवमेव जुगुप्सायाः संकेतोऽप्यस्यैव वर्गस्य विरागे, निर्वेदस्य च निवृत्तौ प्राप्यते।

उपर्युक्तविवेचनेन ममाभिप्रायो नवरसानां सार्वभौमिकतायाः सीापनेन नास्ति, अपितु संगेतदानेनैव यदस्माकं वर्गीकरणं सर्वथानर्गलं कपोलकल्पितञ्च नास्ति। स्थायिभावानां स्थितिः पौरस्त्यपाश्चात्यमनोविज्ञानात्प्रतिकूला नास्ति। सङ्ख्यानिर्धारणमपि न सर्वथा निराधारम्। यद्यपीदमपि युक्तियुक्तमेव यत्तत् सर्वथा निर्दोषमपि नास्ति। परं किं किञ्चिदपि वर्गीकरणं सङ्ख्यानिर्धारणं च निर्दोषं सम्भवति।

# २-विविधानां मनोभावानां मनोवैज्ञानिकं विवेचनम्

दर्शनमनोविज्ञानयोः प्राविधिकीं शब्दावलीं परित्यज्य समान्यतया शब्दावल्या वक्तुं शक्यते यथा 'शब्दार्थमाध्यमेन भावस्य कलात्मिकाभिव्यक्तिः काव्यम्' इति। तस्य चानन्दमय आस्वादो रस इति। शब्दार्थमाध्यमेनाभिव्यक्तस्य भावस्यानन्दमयास्वाद एव रस इत्याशयः। नूनमयमास्वादो विषयिगतः, न तु विषयगतः, इयं ह्यास्वादयितुरेवानुभूतिः। परं नेयं समस्या सुसमाधेया। यदि ह्येवमस्ति तदा 'रसात्मकं वाक्यं काव्यम्,6 रस एव काव्यसार इति रसवादिनांमतिप्रसिद्धानि सूत्राणि किमर्थकानि स्युः। किं काव्यसारस्य स्थितिः काव्यकलेवराच्छब्दार्थयुगलाद्बहिः सहृदयस्य हृदये चैतन्ये वा मान्यते। वस्तुवादिदृशा रसपदार्थो विशिष्यते यः काव्यशरीरे शब्दार्थयुगले सारतयाऽऽत्मतया वा विद्यते। अद्वैतवादिनो व्यक्तिवादिनो वा दृशा रसशब्दस्य व्यावहारिकप्रयोगमात्रमिदम्। अस्य तावद्वास्तविकोऽर्थः स काव्यस्य गुणः सा वा तस्य शक्तिरस्ति या सहृदयस्य रसास्वादे निमित्तीभवति। रसमयस्य वाक्यस्यायमर्थो यद्यः शब्दार्थप्रयोगः सहृदयहृदयं व्यक्तिगतरागद्वेषनिर्मुक्तिं विधाय रत्यादिस्थायिभावमाध्यमेन तस्यामानन्दं ददादीति। स शब्दार्थप्रयोगोः यः सहृदयस्य रागात्मककलात्मकमानन्दं वितरतीति चाधुनिकशब्दावल्यां तदर्थः। अद्वैतवादिनो व्यक्तिवादिनो वादृशा रस आस्वाद एव न पदार्थः।

भावविचेनमपीदंप्रथमतया भरतेनैव कृतम्। नाट्याशास्त्रस्य सप्तमोऽध्यायौ भावमेव व्याख्याति—

'भाव इति कस्मात्? किं भवन्तीति भावाः'। 'किंवा भावयन्तीति भावा':।7

पूर्वा व्युत्पत्तिः सत्तार्थकाद् भूधातोः अस्या आशयः स्थितिः सत्ता वेति।

अपरा तु भूतातोरेव प्रेरणायाम् करणार्थकात्, अस्या आशयः—व्यापकः, कारको वेति।भरतेन काव्यशास्त्रप्रसंगेऽस्मिन् द्वितीय एवार्थो गृहीतः—

भू इति करणे धातुः तथा च भावितं वासितं कृतमित्यनर्थान्तरम्, 'लोकेऽपि सिद्धमहो अनेन गन्धेन रसेन वा सर्वमेव भावितमिति। तच्च व्याप्त्यर्थम्।'

निजाशयस्पष्टीकरणाय भरतेनानुवंश्यास्त्रयः श्लोकाः उद्धृताः—

'विभावैराहृतो योऽर्थोऽनुभावैः स्वैस्तु गम्यते। वागंसत्वाभिनयैः स भाव इति संज्ञितः।वागंमुखरागेण सत्वेनाभिनयेन च।8कवेरन्तर्गतं भावं भावयन्भावउच्यते।।नानाभिनयसम्बद्धान्भावयन्ति रसानिमान्।

स्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभिः।।इति।।एतैर्भावशब्दस्य त्रयो विभिन्ना अर्थाः पुरः स्फुरन्ति।भावः स पदार्थः। यो विभावैनिष्पद्यते (अस्तित्वं स्थितं वा विदन्ति) भावः स पदार्थः। यो विभावैर्निष्पद्यते अस्तित्वं स्थितं वा विदन्ति वाचिकागिकसात्विकैरभिनयरूपैरनुभावैर्गम्यते प्रतीतियोग्यः क्रियते। अत्र काव्यार्थ इति भावपदार्थः।भावः सः पदार्थः। यश्चतुर्विधाभिनयेन कवेर्हृदयगतं भावं भावयति—सहृदयसमाजहृदये व्याप्तं करोति अत्र करोति अत्र 'कविभावस्य सहृदयहृदये व्याप्तिकरं तत्वं भावपदार्थः।'नानाविधाभिनयैर्हैभि सम्बद्धरसान्—काव्यार्थान्—भावयन्ति सहृदयसमाजहृदये व्यापयन्ति इति नाट्यकारैरिमे भावसंज्ञयाभिधीयन्ते। अत्र काव्यार्थ सहृदयहृदये व्यापयन्ति तत्वानि भावपदाभिधेयतयोक्तानि।अस्या व्याख्यायाअयं सारः, नाट्यशास्त्रे भावस्य सत्ता वस्तुगतैव स्वीक्रियते। भावशब्दोऽयं काव्यार्थस्य वाचकः, तस्य काव्यार्थस्य यः सहृदयचेतनायां काव्यवस्तुना वा नाट्यकौशलेन वा व्याप्तो भवति। अथवा तत्तत्ववाचकः, यानि तत्वानि नाट्योपकरणैः कविगतमनुभवं सहृदयचेतनायां व्यापयन्ति। रससामग्रीति यावत्। विभावानुभावस्थायिव्यभिचारिभावा इत्यर्थः। पुनस्तेषां तत्वानां वाचकोऽयम्, यैश्चतुर्विधाभिनयेन व्यक्तः काव्यार्थः सहृदयचेतनां व्याप्नोति, अत्रापि विभावादिसामग्र्येवाभिप्रेता। आधुनिकशब्दावल्यां प्राचीनाचार्यमतानुसारेण भावशब्दः काव्यस्य नाट्यस्य वा संवेद्यतत्वस्य संवेदकतत्वानां वेगानां वा वाचकः। मनोवेगानां मानसिकशारीरिकानुभूतीनां चेतनमात्राया वा न द्योतकः। भावशब्दस्यैकोऽर्थोऽनुभूतिपरकोऽप्यस्ति। यथा—'कवेरन्तर्गतं भावम्' इत्यत्र। यद्यप्यत्रापि संशुद्धमानसिकानुभूतिरूपो नास्ति—अपितु कल्पनात्मकानुभूतिरूप एव। तथापि तत्र तस्य सत्ता वस्तुपरका न भवति, अपि त्वनुभूतिपरकैवेत्यत्र न सन्देहः।भरतस्य भावविवेचने स्फुटमिदं यत्तेन व्यापकतया तृतीयोऽर्थ एव गृहीतः।

ये रसान् भावयन्ति ते भावा इति। भावपदेन तस्य रसव्यञ्जक–विभावानुभावस्थायिव्यभिचारिभावरूप-सामग्र्येवाभिप्रेता। अग्रेसरता तु तेन विभावानुभावौ पृथक्कृतौ। भावाश्चैकोनपञ्चाशत् संख्याताः। अष्टौ स्थायिभावा, त्रयस्त्रिंशत्सञ्चारिभावाः, अष्टै च सात्विकभावाः,'एवमेते काव्यरसाभिव्यक्तिहेतव एकोनपञ्चाशद्भावाः प्रत्यवगन्तव्याः' इति। अत्रागत्य भावपदार्थव्याप्तिर्मनोवेगान्–मानसिकशारीरिकानुभूतीनां काव्यगतरूपाणिं यावदेव स्थिता। तेषां कारणानि, कार्याणि च भावानां परिधेर्बहिष्कृता5। परवर्तिभिराचार्यैरिदमेव मतं प्रायोऽनुसृतम्। भरतादेव प्रेरणां प्राप्य केवलमेकस्य रूपस्य विकासो जातः–अनुपचितस्थाय्युपचितसंचारिभावार्थे।

इत्थं संस्कृतकाव्यशास्त्रे भावपदं सामान्यतस्त्रिष्वर्थेषु प्रयुक्तम्–व्यापकरूपेण समग्रायां रसव्यञ्जकसामग्र्यां यत्र विभावानुभावस्थायिसञ्चारिभावानां सर्वेषामपि समावेशोऽस्ति। काव्यगस्थायिसञ्चारिसात्विकभावेषु मानसिकशारीरिकानुभूतिषु। अनुपचितस्थाय्युपचितव्यभिचारिभावेषु।

सञ्चार्यन्तर्गततया भरतेन केवलं विशुद्धभावा एव न परिगणिताः अपितु तेषु अनेकानि सञ्चारीणि शारीरिकाणि बौद्धिकानि वा प्रक्रियारूपाण्यपि सन्तीति स्वीकारेऽपि प्रश्नोऽयमुपतिष्ठते, यदेवंविधाः क्रियास्तु अन्या अप्यनेकाः सन्ति।शारीरिकक्रिया व्याध्यपस्मारपदमोहग्लानि–श्रमजडतादिपर्यन्तमेव सीमिताः कथं मन्येरन्, बौद्धिकक्रियाणामियत्तापि धृतिमतिवितर्कस्मृत्यादिपर्यन्तमेव कथं स्यादिति। अपिच अपस्मारोऽपि व्याधिरेव। व्याधयस्त्वनेके सन्ति यान्वयं लोकजीवने प्रतिदिन मवलोकयामोऽनुभवामो वा–तदा सशीतसदाहयोरेव ज्वरयोः कथमुल्लेखः? धृतिमतिवितर्कातिरिक्ता ईदृश्योऽनेका वैचारिकस्थितयः सन्ति, या मनुष्येण प्रतिदिनमनुभूयन्ते तासां विविधानां विभिन्नानाञ्च स्थितीनां पृथगुल्लेखमकृत्वाऽऽसां परस्परसमानस्थितीनां स्वतन्त्ररूपेण वर्णनकरः संगतिविशेषः? अस्माकमयमभिप्रायो यदस्य वर्गीकरणस्य कश्चिन्निश्चित आधारो नास्तीति। उपर्युक्तेन तर्केण भरतमतं स्पष्टीकृतं तु भवति किन्तु शारीरिकावस्थानां बौद्धिकक्रियाणां च भावसंज्ञाप्रदानौचित्यं तथापिनुसिद्यति।

व्याधिजडतयोः, वितर्कमत्यादीनाञ्च स्वस्वानुभूत्यात्मकं रूपं चित्तवृत्तित्वमेव भवति, ततस्तेषामपि चित्तवृत्तित्वमेव भवतीत्ययमपि तर्कः सर्वथा निर्णायकतां नार्हति। मनोविज्ञानेऽपि निद्राविबोधश्रमग्लान्यादीनांमूलवृत्तीनां मानसिकानुभवत्वमुल्लिख्यते। तथापीदं न सिद्ध्यति यते'भावाः' सन्तीति। इत्यन्तु जीवनस्य प्रत्येक व्यापारश्चित्तवृत्तित्वेऽधिरोपितः स्यात्। नास्त्येवासौ व्यापारो योऽन्ततो मानसिकोऽनुभवो न निष्पद्येत। तदा तु घटनाभावयोर्विषयानुभूत्योश्च मिथोऽन्तरमेव मार्जितं स्यात्। तृतीयः प्रश्नः सङ्ख्याविषयकः। कयाचिदपिदृष्ट्या विचार्यमाणं सञ्चारिभावानां त्रयस्त्रिंशत्सङ्ख्याकत्वं साधयितुं न शक्यते। यदि सञ्चारिणां

विशुद्धं चित्तवृत्तित्वं मनोविकारत्वं वा मन्येत, तदापि तद्गणनमसुकरम्। मनोविज्ञानेन विशेषादाधुनिकेन तेनेदृशं गणनं नैव सम्भवति। दर्शनाचारशास्त्रकाव्यादिभ्योऽपियदि भावनामानि संकल्येरन्, तथापि तेषां सङ्ख्यानेऽनेतगुणितास्यात्। यदि चैषु बौद्धिकानुभूतयोऽपि सम्मेल्येरन्, तदा तु का कथा? अस्माकं दैनिकेऽप्यनुभवेऽनेके भावास्तादृशः समायान्ति, ये परिगणितेभ्यस्तेभ्यो बहिस्तिष्ठन्ति। संस्कृतचार्याणामपि पुरः प्रश्नोऽयमुदतिष्ठत्। भानुदत्तेन दशानां कामदशानाम्, भोजादिना च हावादीनामपि व्यभिचारिष्वेवान्तर्भावः समीहितः, ततश्च सात्विकान्यपि वर्गेऽस्मिन् समाविवेषितान्यभूवन्। मात्सर्योद्वेगदम्भेर्ष्याविवेकनिर्णयक्लैब्यक्षमाकौतूहलोत्कण्ठा विनय संशयधृष्टवादयोऽपि भावाः समक्षमुपस्थिताः, अन्ते तेषां सर्वेषामपि परिगणि तेषु व्यभिचारिष्वेवान्तर्भावोऽक्रियत। यथा मात्सर्यमसूयायाम्, उद्वेगस्त्रासे, दम्भोऽसहित्यायाम्, ईर्ष्याऽमर्षे मतौ, क्षमा धृतौ, क्लैव्यं दैन्ये, उत्कण्ठौत्सुक्ये, विनयो लज्जायाम्, संशयस्तर्के, कौतूहलधृष्टते चपलतायां समावेश्येताम्। परमथैतावता न भवति परितोषः। पौरस्त्यमीमांसयापि भूयांसो मनोविकारा एषां परिधेर्वहिश्चरन्ति। यथा-आदरश्रद्धादयः प्रश्रयस्य।

## ल-विभावानुभावसञ्चारिभावानांमनोवैज्ञानिकंविवेचनम्

संस्कृतकाव्यशास्त्रे सञ्चारिणः परिभाषैषा कृतास्ति–
विशेषादाभिमुख्येन चरणाद् व्यभिचारिणः।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्भिदाः।।१३इति।।

एषां संख्या त्रयस्त्रिंशत्सम्मता। भरतेन निम्नक्रमेणैते वर्णिताः—

'निर्वेदग्लानिशंकासूयामदश्रमालस्यदैन्यचिन्तामोहस्मृतिधृतिव्रीडाचपलताहर्षवेगजडतागर्वविषा दौत्सुक्यनिद्रापस्मारसुप्तविबोधामर्षावहित्थोग्रतामति-व्याध्युन्मादमरणत्रासवितर्काः।'
सञ्चार्यन्तर्गततया भरतेन केवलं विशुद्धभावा एव न परिगणिताः अपितु तेषु अनेकानि सञ्चारीणि शारीरिकाणि बौद्धिकानि वा प्रक्रियारूपाण्यपि सन्तीति स्वीकारेऽपि प्रश्नोऽयमुपतिष्ठते, यदेवंविधाः क्रियास्तु अन्या अप्यनेकाः सन्ति। शारीरिकक्रिया व्याध्यपस्मारपदमोहग्लानि—श्रमजडतादिपर्यन्तमेव सीमिताः कथं मन्येरन्, बौद्धिकक्रियाणामियत्तापि धृतिमतिवितर्कस्मृत्यादिपर्यन्तमेव कथं स्यादिति। अपिच अपस्मारोऽपि व्याधिरेव। व्याधयस्त्वनेके सन्ति यान्वयं लोकजीवने प्रतिदिन मवलोकयामोऽनुभवामो वा—तदा सशीतसदाहयोरेव ज्वरयोः कथमुल्लेखः? धृतिमतिवितर्कातिरिक्ता ईदृश्योऽनेका वैचारिकस्थितयः सन्ति, या मनुष्येण प्रतिदिनमनुभूयन्ते तासां विविधानां विभिन्नानाञ्च स्थितीनां पृथगुल्लेखमकृत्वाऽऽसां परस्परसमानस्थितीनां स्वतन्त्ररूपेण वर्णनकरः संगतिविशेषः? अस्माकमयमभिप्रायो यदस्य वर्गीकरणस्य कश्चिन्निश्चित आधारो नास्तीति। उपर्युक्तेन तर्केण भरतमतं स्पष्टीकृतं तु भवति किन्तु शारीरिकावस्थानां बौद्धिकक्रियाणां च भावसंज्ञाप्रदानौचित्यं तथापिनुसिदयति।

इदमिह भरतविवेचनैः स्पष्टम्, यथा तस्य दृष्टावमीषां भावानामभिनयात्मकं रूपमेव प्रमुखम्, मनोवैज्ञानिकं तु गौणम्। अतएव तेन सञ्चारिभावेषु मनः शरीरावस्थाः सर्वा अपीदृश्योऽन्तर्भाविताः, याः सामान्येनाष्टसु रसेषु सञ्चरन्ति। सञ्चारिणा का नाम वास्तविकी स्थितिः? इत्यत्र विदुषां तीव्रो मतभेदः। आधुनिकैर्विद्वद्भिर्मनोविज्ञानाधारेणैतत्साधितं यत्त्रयस्त्रिंशत्सञ्चारिषुः—

'चतुर्दशैव केवलं भावा मनोविकारा वा—निर्वेदशंकाहर्षदैन्योग्रताचिन्ता त्रसासूयामर्वगर्वव्रीडावेगविष- दौत्सुक्यानीति।'

'चत्वारो न मनोवेगा अपि तु ज्ञानात्मका अनुभवा एव—धृतिमतिवितर्कावहित्थानि।'

'पञ्च शारीरिकसंवेदनामात्राणि—ग्लानिश्रमालस्यमदमोहाः।'

"दश मानसिकानुभवकाटौ न निविशन्ते- -स्मृतिस्वप्ननिद्राविबोधजडताचपलतापस्मारव्याध्युन्मादमरणानि।"

डाक्टरगुलाबरायेणाप्यस्मिन् प्रसंगे काश्चन् शंका उत्थाप्य ताः समाहिताः।

तत्र प्रथमा शंका तावदियम्—श्रमस्वप्ननिद्राविबोधापस्मारोन्मादव्याधीनां मनःसम्बन्धाभावात्कथं भावत्वम् इति। तत्र तत्कृतं समाधानञ्च—एषां सर्वेषामप्यति भौतिकी स्थितिः, सहैव तदनुकूला मानसिकी स्थितिरप्यस्तीति।

अपरा च-त्रासशंकाविषादामर्षादयः केचनं भावाः स्वतन्त्रास्तित्वाभावात्, भयशोकक्रोधादिस्थायिभावेष्वन्त- भीसम्भवाच्चोपेक्षणीयाः इति।

समाधानन्तु सत्यपि साम्ये शंकात्रासयोर्भयात्, अमर्षस्य क्रोधात्, विषादस्य च शोकात् स्पष्ट एव भेद इति।

तृतीया च–धृतिमत्यवहित्थादयः केचित्सञ्चारिभावा ज्ञानमूलकत्वान्न भावसंज्ञार्हा इति।

समाधानन्तु ज्ञानमूलकत्वेन तेषां भावत्वे न भवति बाधः, प्रायेण सर्वेषामपि भावानां भवत्येव ज्ञानाश्रितत्वम् इति।

अपरत्र परम्परानिष्ठैरन्यैरनुसन्धातृभिस्तु रसगंगाधराधारेण डाक्टरराकेशस्याक्षेपान् खण्डयद्भिरिदं साधितम् यदिमे त्रयस्त्रिंशत् सञ्चारिभावाः सर्वेऽपि चित्तवृत्तिरूपाः सन्ति। तथाकथितासु भौतिकस्थितिष्वपि चित्तवृत्तित्वरूपस्य भावत्वस्य स्थितिरप्यनिवार्यतया तेषु विद्यमानाऽनुभूयते। यथा–व्याधौ मनस्तापः, निद्रायां चित्तसम्मीलनम्, स्वप्ने च ज्ञानम्। इत्थमेव ज्ञानात्मका अनुभवा अपि चित्तवृत्तिरूपा एव सन्ति। भारतीयदर्शने हि ज्ञानं चित्तवृत्तिभ्यो नातिरिच्यते।

इदं विवेचनमाधारीकृत्य सञ्चारिणामौचित्यानौचित्यविषये त्रीणि मतानि प्राप्यन्ते सञ्चारिणो न तस्मिन्नर्थे भावाः, यस्मिन्नर्थेस्थायिनो भवन्ति। भरतेन भावशब्दो व्यापकत्वेन प्रयुक्तः। अतः सञ्चारिषु केवलं मनोविकारा मनोवेगा एव वा न गण्यन्ते, अपितु ताः शारीरिक्यो मानसिक्योऽवस्था अप्यत्र गणिताः, यासामष्टमी रसैः सह–विशेषात्तेषामभिनयेन सह–प्रत्यक्षो घनिष्ठो वा सम्बन्धोऽस्ति। अतः प्रत्येकं सञ्चारी शुद्धभावरूपः केवलचित्तवृत्तिरूपो वा नास्ति। भरतस्य धनञ्जयस्य च विवरणैरियं धारणा परिपोष्यते, यत्र व्याध्युन्मादापस्मारनिद्राविबोधादिषु शारीरिकरूपेष्वधिकं बलमाधीयते। यथा–

भरतः–अपस्मारो नाम देवयक्षनागब्रह्मराक्षसभूतप्रेत-
पिशाचग्रहणानुस्मरणोच्छिष्टशून्यागारसेवना-
शुचिकालान्तरापरिप- तनव्याध्यादिभिर्विभावैः
समुत्पद्यते। इति।

धनञ्जयः–आवेशो ग्रहदुःखाद्यैरपस्मारो यथाविधि।
भूपातकम्पप्रस्वेदलालाफेनोद्गमादयः।

सञ्चारिणां विवेचनस्य पृष्ठता मनोविज्ञानतर्कयोर्नास्ति पुष्टः कश्चिदाधारः। अतस्तत्र सम्यग्व्यवस्थाऽभावोऽस्ति, अर्थेभ्योऽपि न्यूना एवैतादृशः सन्ति, ये वस्तुतो भावसंज्ञामर्हन्ति। तेष्वपि केषाञ्चित्कतिपयेषु स्थायिष्वन्तर्भावः सम्भवति। केचिच्चज्ञानात्मकानुभवाः, भौतिकसंवेदनरूपा एव वा सन्ति, अनेके तु मानसिकानुभवकोटावेव न निविशन्ते।

इदं सत्यम् यत् समे सञ्चारिणः स्थायिभाववद् विशुद्धा भावा न सन्ति, तथापि यथा पण्डितराजजगन्नाथेन प्रदर्शितम्, तेषां कस्यचिदपि चित्तवृत्तिरूपतायां सन्देहः कर्तुं न शक्यते, वास्तविकः प्राणान्तो न मरणार्थः, प्रत्युत तत्पूर्वावस्था

मूर्च्छादिरेव। येषु शारीरिक्या बौद्धिक्या वा चेतनाया प्राधान्यमस्ति, तेऽपि चेतनात्मानश्चित्तवृत्तिरूपा वा। अतो निर्णयोऽयं न संगच्छते यदनेके सञ्चारिणस्तु केवलं बौद्धिकप्रक्रियाः, शारीरिकसंवेदनानि, भौतिकावस्था वा सन्तीति, यतस्तेषामपि भवत्येवानुभूत्यात्मकं रूपम्। वास्तविकं पृष्ठबलमविज्ञाय परम्पराखण्डनं नोचितम्।

उपर्युक्तेषु मतेषु प्रत्येकस्मिन् सत्यांशो विद्यत इति निश्चितम्। भरतरसविवेचनाध्ययनान्तरमिदं स्पष्टोभवति यद् भावशब्दस्य तेन चित्तवृत्यपेक्षया व्यापकतरेऽर्थे प्रयोगः कृतः, सर्वे सञ्चारिणश्च विशुद्धचित्तवृत्तिरूपा न सन्ति। भरतमतेन नाट्यं लोकानुकृतिरस्ति। अतस्तेन विभिन्नरससम्बद्धाः प्रमुखा मानसिकशारीरिक स्थितयः, या एषां रसानां मूलभावानां सन्दर्भे सामान्यतोऽस्थायिरूपेणोत्पद्यन्ते, सञ्चारिणां (सञ्चरणशीलावस्थानां) मध्ये परिगणिताः। ततः पण्डितराजस्यापीदं कथनं नामान्यम्, यत्प्रतिसञ्चारिभावं स्वकीयमनुभूत्यात्मकं रूपं भवतीति—व्याध्यपस्मारमरणादीनामपि येषु शारीरिकविकारप्राधान्यम्, धृतिमतिवितर्कादीनामपि वा, येषु बुद्धितत्वप्रामुख्यमस्ति—प्रातिस्विकं विशिष्टानुभवो भवति, अतो न व्याधिजन्याः शारीरिकविकारा अपि तज्जन्या मनस्तापादयो मनोविकारा एव सञ्चारिभावान्तर्गततया ग्राह्याः। अनयोस्तर्कयोः स्वीकारेऽपि भूयस्यः शंकाः शिष्यन्ते।

## व-साधरणीकरणव्यापारस्यदार्शनिकंमनोवैज्ञानिकं चानुशीलनम्

कविगतत्वेन रससिद्धौ काव्यशास्त्रस्यैको महत्वपूर्णः प्रश्नः पुरः स्फुरति— रसस्य सम्प्रेरणं वा भवत्यभिव्यक्तिर्वेति। रसो मूलतः कविगतानुभूतिरेव, काव्यगतशब्दार्थमाध्यमेन तस्याः सामाजिकहृदये सम्प्रेषणं सञ्चारो वा भवतीति सम्प्रेषणपदार्थः। पाश्चात्यकाव्यशास्त्रे विषयेऽस्मिन्मतद्वयम्। तत्र प्राचीनानामिदम्—सर्वे तावदेकेन चैतन्यतत्वेनानुस्यूताः, अतः प्रतिपरिस्थिति प्रतिघटनं सर्वेषामपि हृदयेष्वेकैव प्रतिक्रिया भवति। इयं धारणा वस्तुतः एकात्मवादमाश्रिता, पाश्चात्यानां ब्लेकादिरहस्यवादिचिन्तकानामयमेव विश्वासिति किन्तु नांगीकरोति आध्यात्मिकमाधारम्। अतस्तद्धारणायां किञ्चिदन्तरमायाति। आई० ए० रिचर्ड्सशब्देषु-'वयं वक्तुं शक्नुमो यदिदं सम्प्रेषणं तदा घटते यदा कस्यचिन्मनः स्वपरिवेशं प्रति तथा व्यवहरति, यथान्यस्य मनस्तेन प्रभावितम् स्यात, अस्यान्यस्य च मनसि कश्चिदेतादृशो भाव उदयते, यः पूर्वस्य भावेन समानोंऽशतश्च तत्कारणेनोद्बुध्यते इति। एतद्धारणानुसारेण कवेरनुभूतिरेव सहृदयस्य चित्ते सम्प्रेषिता यथावद्वा स्थानान्तरिता न भवति। प्रतिसहृदयचित्तं तत्समाया अनुभूतेरुदयेऽप्येषां सहृदयानामनुभूतयः कवेरनुभूतिसादृश्यान्मिथः समाना अपि स्युरित्यत्र नास्ति सन्देहः।

समानतायास्त्वस्या अस्ति सीमा। तत्रापि भेदो भवेत, कवेरनुभूतेरपि, मिथोऽनुभूतेरपि। अनेन विवेचनेन रसप्रसंगेसम्प्रेषणपदस्य द्वावर्थौ गृह्येते कविहृदयगतो रसः—आनन्दरूप आस्वादः—शब्दार्थमाध्यमेन सामाजिक हृदये यथावत्स्थानान्तरितो भवतीत्येकः। कविहृदयगतो रसः सहृदयहृदये समामानन्दानुभूतिमुद्बोधयतीति द्वितीयः। भारतीयोऽभिव्यक्तिवादस्तावदिदं तु मन्यते यदेकमेव चैतन्यतत्वं कवेः सहृदयस्य च चित्तेऽनुस्यूतमस्ति इति। किन्तु तस्योपर्युक्तं निष्कर्ष स न मन्यते। अत एव कविगतरसस्य सहृदयहृदये यथावत्स्थानान्तरणं स न स्वीकुरुते। सहृदयस्य रसो हि चैतन्यानुभवः, स च तस्यावरणमुक्तस्य स्वात्मनो विषयः, न तु कविसम्प्रेषित इति। कविरसो निमित्तिकारणम्। यः शब्दार्थमाध्यमेन सहृदयस्य रसरूपिणीं चिच्छक्तिम् अभिव्यञ्जयति, तत्र स्वयं न प्रविशति। इयमनुभूतिः कवेरेवानुभूतिः, सर्वथा तदभिन्नानुभूतिः, तत्समाना वा सहृदयस्य व्यष्टिगतानुभूतिः, इतीमे त्रयो विकल्पाः समक्षमायान्ति। एषु प्रथमोऽसम्भवतया परित्यज्यते, अनुभूतेः स्वमात्रगोचरत्वात्। द्वितीयं विकल्पं मनोविज्ञानं सर्वथा निषेधति। तद्धि न स्वीकरोति यत्कविपाठकयोः, पाठकानां वा मिथोऽनुभूतिः सर्वथाऽभिन्नापि भवितुमर्हतीति। परमद्वैतदर्शनम्- एकात्मवादो वा-तं विकल्पम् पोषयति। रसो हि यदा तत्वत् एवावरणमुक्तिचिद्रूपस्तदा कविगतरसे सहृदयगतरसे च द्वयोः सहृदयोर्वा रसानुभूतौ भेदः कथं सम्भवति। तृतीयो विकल्पो मनोविज्ञानेन स्थाप्यते, तन्मन्यते यद्द्वयोर्व्यक्त्योरनुभूत्योरैक्यं न सम्भवति। प्रेरकाधाराणामेकत्वे तासु समानता तु सम्भवति, परं नैकता। सहृदयस्य कवेश्चानुभूत्योराधारः समानः, ते चांशतस्तत्प्रेरिते अपि स्तः। तेन ते समाने तु भवतः परमेकत्वं नापद्येते। अद्वैतसिद्धान्ताघृतेनाभिव्यक्तिवादेन सहास्य संगतिर्न भवति। अयं तु रसमखण्डं मन्यते, मनोवैज्ञानिकं मतन्तु कविगत- सहृदयगतयो रसयोरनेकसहृदयगतेषु वा रसेषु प्रकार भेदं मात्राभेदमपि पश्यति। परमेतेनापि मतेन रसोऽभिव्यजत एव न तु सम्प्रेष्यते। कवेरनुभूत्या सहृदयस्यानन्दमयी स्वानुभूतिरुद्बुध्यते। इत्थं सम्प्रेषणसञ्चारयोरपि नवीनोऽर्थः प्रायोऽभिव्यक्तिसन्निहितो भवति। वस्तुतो भावानां मूले वासनायाः सहज वृत्तीनां वा सत्तयाः स्वीकारे भारतीयदर्शनाधुनिकमनोविज्ञानयोरुभयोरपि स्वीकार्या भावाभिव्यक्तिः स्वतःसिद्धा भवति। अनुभवसम्प्रेषणत्य वाच्यार्थरूपेण सम्भावना नावशिष्यते। अतो रसो न सम्प्रेष्यः, अपि तु व्यङ्ग्य एव।

रसनिष्पत्या सह साधारणीकरणं तावसम्पृक्तम्। काव्योदितविशिष्टरामादिपात्रभावाः सर्वस्य विशेषतः सहृदयजनस्यास्वादविषयतां कथं यान्तीति काव्यशास्त्रस्यात्यन्तं मौलिकः प्रश्नः। काव्यं मानवजीवनस्यातिप्राचीनी मूल्यवांश्र्चोपकारणविशेषः। तत्सहस्राब्दीभ्यः संस्कृतमानवस्य आत्माभिव्यक्तेरात्मास्वादस्य च सुन्दरं माध्यममस्ति यदेव चिन्तनशीलेन मानवेन जीवनस्य जगतश्र्चानेकैस्तथ्यैसह

काव्यस्वादस्यापि विषये विचारयितुमारब्धं स्यात्। तदा प्रथमः प्रश्नोऽयमेवो:त्थितः स्यात्- को नु सम्बन्धोऽस्माकं रामदुष्यन्तादिभिः सहेति। देशकालकृते महति व्यवधानेऽस्मासु तेषु च विद्यमाने तदीया भावा अस्मदास्वाद्यतां कथं यान्तीति च। एवंविधानां प्रश्नानां सर्वतः प्रामाणिकं समाधानमयमेव साधारणीकरणसिद्धान्तः, यद्वीजन्तु नाट्यशास्त्रेऽपि लभ्यते-एभ्यश्च सामान्यगुणयोगेन रसा निष्पद्यते इत्यादि। परं तस्य निश्चितो निर्देशः भट्टनायकोद्धरणेष्वेवेदंप्रथमतया प्राप्यते-तस्यायमत्राभीष्टोंऽशः-

'विभावादिसाधारणीकरणात्मना भावकत्वव्यापारेण भाव्यमानो रसः भोगेन परं भुज्यत इति।'एतद्विश्लेषणेन तथ्यानीमानि लभ्यन्ते—साधारणीकरणं विभावादीनां भवति।

इदं साधारणीकरणमेव वस्तुतो भावकत्वाख्यस्य व्यापारस्य प्राणः, उभेअपीमे अभिन्ने एव।भावकत्वाव्यापारेण भाव्यमानः स्थायिभाव एव रसरूपे परिणमति। काव्यप्रकाशटीकाकारैर्भाव्यमानसाधारणीकृतयोः परस्परपर्यात्वं स्वीकृतम्। अत्र च विप्रतिपत्तये न स्यादवकाशविशेषः। साधारणीकरणं रसास्वादातप्राक्तनी प्रक्रियास्ति, या रसस्य विभिन्नानयवान् स्वस्ववैशिष्ट्यमुक्तान्विधायास्वाद्यरूपेण प्रस्तौति। अभिनवगुप्तेन भट्टनायकमतं संशोध्य साधारणीकरणप्रसंगोऽयं स्वपद्धत्या प्रस्तुतः। तदुद्धरणानि च—'तस्याञ्च यो मृगपोतकादिर्भाति तस्य विशेष रूपत्वाभावाद्भीत इति, त्रासकस्यापारमार्थिकत्वाद् भयमेव परं देशकालाद्यनालिंगितम्।' अस्यायमाशयः-आश्रयालम्बनयोः साधारणीकरणे स्थायिभाव एव देशकालबन्धनादिमुक्तो भवनि।इदं च तथ्यमधिकं स्पष्टयताभिनवेन लिखितम्-'तत एवं भीतोऽयं शत्रुर्वयस्यो मध्यस्थो वा इत्यादिप्रत्ययेभ्यो दुःखसुखादिकृतबुद्ध्यन्तरोदयनियमवत्तया विघ्नबहुलेभ्यो विलक्षणं निर्विघ्नप्रतीतिं ग्राह्यं भयानको रस इति। इत्यनेन काव्ये स्थायिभावः सर्वविधव्यक्तिसंसर्गमुक्तो भवति। एते हि व्यक्ति संसर्गाः स्वपरिमितिवशाद् दुःखादिकारणानि भवन्ति। अतस्तेभ्यो मुक्तेरभिप्रायो भवतिलौकिकसुखदुःखादिचेतनातो विमुक्तिरिति।'अत एव न परिमितमेव साधारण्यम्, अपि तु विततम् अत एव सर्वसामाजिकानामेकघनतयैव प्रतीतिः सर्वेषामनादिवासनाचित्रितचेतसां वासनासंवादात्।' तथा ह्येकाग्रसकलसामाजिकजनः खलु नृत्तं गीतं सुधासारसागरत्वेन मन्यते।एतैरुद्धरणैरभिनवानुसारेण-साधारणीकरणं विभावादीनामेव न भवति अपितु स्थायिभावस्यापि तद्। यथा च विभावादयः स्थायिभावस्य कारणानि। तथैव विभावादिसाधारणीकरणं
स्थायिभावसाधारणीकरणकारणम्।स्थायिभावसाधारणीकरणपदार्थश्चैव
देशकालादिबन्धनाद् व्यक्तिसंसर्गादितश्चैवमुक्तिः। व्यक्तिचेतनाप्रतीतौ सुखदुःखात्मकता सामाविशति तदभावे त्वैन्द्रियसुखदुःखभावनापि नश्यति।कलाक्षेत्रे भावसाधारणीकरणं

सामूहिकी क्रिया न तु वैयक्तिकी, केवलस्य च प्रमातुरेव भावो न भवति मुक्तः, अपितु सर्वेऽपि सामाजिका एकाग्रचित्ताः सन्तो मुक्तभावं सामूहिकतयानुभवन्ति। अतः स्थायिभावसाधारणीकरणमेव साधारणीकरणसारः। उपर्युक्तसंशोधनप्रकाशे काव्यप्रकाशटीकाकारो गोविन्दठक्कुरो भट्टनायकस्य साधारणीकरणसिद्धान्तं संक्षेपेण स्वच्छतया चैवमुपास्थापयत्—
'भावकत्वं साधारणीकरणम्। तेन हि व्यापारेण विभावादयः स्थायी च साधारणीक्रियन्ते। साधारणीकरणं चैतदेव यत्सीतादिविशेषाणां कामिनीत्वादिसामान्येनोपस्थितिः। स्थाय्यनुभावादीनाञ्च सम्बन्धिविशेषानवच्छिन्नत्वेन।' अत्र सन्तिकाश्चिद्विप्रतिपत्तयः, दृढज्ञानाय ताः समाधेयाः। तत्रैका विप्रतिपत्तिरियम्- यत्साधारणीकरणं भावकत्वात्मकं न तत्पर्यायः। अत्रास्ति तर्कद्वयम्— भट्टनायकेन 'साधारणीकरणकरणात्मना' इत्युक्तं न तु 'साधारणीकरणात्मना' इति। किञ्च विभावादिसाधारणीकरणमेव न केवलं भावकत्वकार्यम् यावन्निजमोहसंकटतानिवारणमपि। अस्मन्मते तु नास्त्येतावत्सूक्ष्मेक्षणापेक्षा सिद्धान्तप्रतिपादनबाधकत्वात्तस्याः। किञ्चात्र प्रथमस्तर्कः शब्दमात्राश्रितः, नास्त्यनयोः परयोर्मूलार्थे भेदविशेषः। द्वितीयस्तर्कोऽपि निजमोहसंकटतानिवारणस्य साधारणीकरणांगतया, समनन्तरञ्च स्थायिभावसाधारणीकरणोपायतया न विचारसहः। अपरा च विप्रतिपत्तिर्भट्टनायकस्यैव तदतोव्याधातं दर्शयद्भिर्वाक्यैरुपस्थापिता। तानि यथा—
'न च सा प्रतीतिर्युक्ता। सीतादेरविभावत्वात्। स्वकान्तास्मृत्यसंवेदनात्। दवतादौ साधारणीकरणायोग्यत्वात्। समुद्रलंघनादेरसाधारण्यात्।
एतैः प्रतीयते भट्टनायकस्य लोकोत्तरैः पात्रैस्तत्कार्यैश्च सह साधारणीकरणं माभिमतम् इति। वस्तुतस्तु रसस्य प्रत्यक्षप्रतीतिर्न सिद्ध्यति इति स्वमतं दर्शयितुमेव तस्याय तर्कः। स च स्पष्टः। रसस्य प्रत्यक्षप्रतीतौ स्वीकृतायां सीतादिदेवीनां समुद्रलङ्घनादिदेवकार्याणाञ्च साधारणीकरणं न सेत्स्यति। सिद्धं तु साधारणीकरणमिति रसस्य प्रत्यक्षप्रतीतिरसिद्धा। शोभां शोभयतीव दीपकशिखा चित्रालये दीपिता, इत्यन्तर्जनकात्मजामकवयत् सञ्चिन्त्य च स्वां दशामुअब्रूतानुजमेष निर्मलमना वाचन्तु वेलोचिताइत्येवं त्वनुजे प्रवः कथतवान् सद्रूपलुभ्यन्मनाः। सीतावक्त्रस रोजकान्तिमकरन्दं तु पिबन् भृंगवत्।। अत्राश्रयो रामः, विषयश्च (आलम्बनम्) सीता ! वासन्तिकवैभवसम्पन्ना पुष्पवाटिकोद्दीपनम्। रामस्य पुलकादयोऽनुभावाः। रतिः स्थायिभावः, हर्षवितर्कमत्यादयश्च व्यभिचारिभावाः। उक्तव्याख्यानुसरेण प्रसंगेऽस्मिन् रसास्वादनप्रक्रियायामेषां समेषां साधारणीकरणं भवति। तत्राश्रयस्य रामस्य साधारणीकरणे कृते रामो रामो न भवति, अपि तु रतिमुग्धः साधारणः पुरुषः। तत्सम्बद्धा देशकालव्यक्तिवैशिष्ट्यादयोऽपि तिरो भवन्ति। नारीसौन्दर्याभिभूतं

साधारणकिशोरचित्तं चोल्लस्य पुरः स्फुरति। विषयालम्बनस्य सीतायाः साधारणीकरणमप्येतैः समानं प्रायः। तस्या अपि देशकालाद्यवच्छिन्नं वैशिष्ट्यं समाप्यते। साधारणकामिनीरूपं चावशिष्यते अनुभावसाधारणीकरणे रामस्य चेष्टास्ततो विच्छिद्य साधारणरतिमुग्धकिशोरस्य चेष्टात्वमुपयन्ति। रतयादयः स्थायिभावाः, हर्षादयश्च व्यभिचारिभावा अपि साधारणस्य रामसीतासम्बन्धं, सहृदयतदालम्बनसम्बन्धञ्च परिहृत्य वैयक्तिकरागद्वेषविमुक्ता भवन्ति। इत्थमत्रत्यो रतिः स्थायिभावो न रामसीतयोः, न सहृदयसीतयोः, न च सहृदयतत्प्रणयपात्रयोरवशिष्यते, अपि तु निर्मुक्तः स्वपरचेतनानिर्विशेषः सम्पद्यते। मूलतोऽयं सहृदयस्यैव स्थायिभावः, साधारणीकरणेन तु व्यक्तिचेतनाभ्यो निर्मुक्तः। एवञ्च रसावयवेषु यानि मूर्तानि तानि विशेषं विहाय सामान्यानि भवन्ति। अमूर्तानि च व्यक्तिसंसर्गमुक्तानि। विभावादीनां देशकालादिभ्यो मुक्तिः, भावानांञ्च स्वपरचेतनाभ्यः।विश्वनाथजगन्नाथयोस्त्वाचार्ययोर्विवेचने वैचित्र्यसंकेताः केचिदुपलभ्यन्ते। विश्वनाथेन यद्यपि स्थायिविभावादीनां सर्वेषां साधारणीकरणं स्वीकृतम्।साधारण्येन रत्यादिरपि तद्वत्प्रतीयते।परस्य न परस्येति ममेति न ममेति च।तदास्वादे विभावादेः परिच्छेदो न विद्यते।।इति।।10

किन्तु तेनाश्रयस्य प्रमात्रा सहाभेदे तादात्म्ये एवाऽऽचार्यान्तरापेक्षयाऽधिकं महत्वमाहितम्—व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः।तत्प्रभावेण यस्यासन्पाथोधिप्लवनादयः।प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते।उत्साहादिसमुद्बोधः साध रण्याभिमानतःनृणामपि समुद्रादिलङ्घनादौ न दुष्यति।।इति।। अस्यायमाशयः—साधारणीकरणव्यापारप्रभावेण प्रमातुराश्रयेण सह तादात्म्यं भवति। न सामान्याश्रयेण अपितु लोकोत्तरशक्तिसम्पन्नेन देवादिनापि। यथा—लोके सामान्यजनेन समुद्रलङ्घनोत्साहानुभवो न सम्भवति। काव्यनाट्यादौ तु साधारणीकरणप्रभावेण प्रमातुर्हनुमदाद्यैः सह तादात्म्ये तादृशोत्साहोऽपि सहजः सम्भवति। अभावात्मकतया भट्टनायकेनोत्थापितोऽयं पक्षः, विश्वनाथेन भावात्मकया प्रतिष्ठापितः। पण्डितराजेन जगन्नाथेनापि नव्यन्यायालोके प्रकारान्तारेणायतादात्म्यमुक्तम्। सन्दर्भेऽस्मिंस्तेन दोषशब्दप्रयोगोऽधिकमादृतः—

'काव्ये नाट्ये च, कविना नटेन च प्रकाशितेषु विभावादिषु व्यञ्जनव्यापारेण दुष्यन्तादौ शकुन्तलादिरतौ गृहीतायामनन्तरं च सहृदयतोल्लासितस्य भावनाविशेषरूपस्य दोषस्य महिम्ना, कल्पितदुष्यन्तत्वावच्छादिते स्वात्मन्यज्ञानावच्छिन्ने शुक्तिकाशकल इव रजतखण्डः समुत्पद्यमानोऽनिर्वचनीयः साक्षिभास्यशकुन्तलादिविषयकरत्यादिरेव रसः। इति।

इदमपि विश्वनाथोक्तादभिन्नमेव। केवलं दर्शनवर्मविष्टितामिदम्। पण्डितराजस्य दार्शनिके विधाने नास्ति साधारणीकरणावकाशः। वस्तुतः पण्डितराजेन सामान्येन साधारणीकरणं न स्वीकृतम्—

'यदपि विभावादीनां साधारण्यं प्राचीनैरुक्तम्, तदपि काव्येन शकुन्तलादिशब्दैः शकुन्तलात्वादिप्रकारकबोधजनकैः प्रतिपाद्यमानेषु शकुन्तलादिषु दोषविशेषकल्पनं विना दुरुपपादम् । इति। इदमत्र वचनानपेक्षम्– यदियमस्वीकृतिः केवलं शाब्दिकी, सैद्धान्तिकी वास्ति, व्यवहारे तु साधारणीकरणं सोऽपि न प्रतिषेधति। अत्र पण्डित राज दृशा तु भ्रमो वास्ति भावनादोषो वा। दर्शनावरणापसारणपुरस्सरं तु दृष्टेऽत्राप्याश्रयेण सह प्रमातुस्तादात्म्यं सहानुभूतिरेव च प्रतिपाद्यते । कवेर्भावनारूढकल्पनया सामाजिकसहृदयतोद्बुध्यते, स चाश्रयेण सह तादात्म्यमनुभवति समानं भावमनुभवति।लौकिकालौकिकव्यवधानं तत्र न शिष्यते। दुष्यन्ततादात्म्येन रतिमिव हनुमत्तादात्म्येन समुद्रलङ्घनौपयिकम् उत्साहमपि सोऽनायासमेवानुभवति।पण्डितराजादनन्तरं गम्भीरः शास्त्रीयविवेचकमः प्रायोऽस्तमितः। हिन्द्या रीतिकवीनामपनुरागः काव्यशास्त्रस्य रोचकेषु सरलेषु च प्रसंगेषु कविशिक्षापर्यन्तं वा सीमितोऽभूत्। साधारणीकरणादिषु तात्विकविषयेषु तेषां मनो नारमत। तेन काव्यशास्त्रीयस्यातिमहत्वपूर्णस्य मौलिकस्य च विषयस्य विवेचनं रुद्धगतिकमभूत्।प्रायः शताब्दीश्रयानन्तरमाचार्यरामचन्द्रशुक्लेन स्वकीये प्रसिद्धलेखे 'साधारणीकरणं व्यक्तिवैचित्र्यवादश्चेतिविषयके सहृसेदं पुनरुद्धतम्। शुक्लस्यायं लेखो भारतीय काव्यशास्त्रविषयकानुसन्धानस्य परिच्छेदोऽंग वा नासीत्, अपितु स्वतन्त्रचिन्तनपरिणामरूपः। तस्य दृष्टिरतीतापेक्षया वर्तमाने स्थिराभूत्, तेन चास्य प्राचीनसिद्धान्तस्य स्वाभिमत लोकधर्मसिद्धान्तस्य समर्थने एवोद्धृतिर्व्याख्या चाक्रियत। अतोऽत्र लेखे साधारणीकरणसिद्धान्तस्य शास्त्रीयं विवेचनं नास्ति, अपितु प्रमुखतया पुनराख्यानमेव एवैनैव च रूपेणास्य सीापनानां मूल्यमंकनीयम्।विवेच्यविषयसम्बद्धानि शुक्लोद्धरणानि चेमानि—

यावत्कस्यचिद्र भावस्य कश्चिद्विषयोऽनेन रुपेण नानीयते यत्स सामान्येन सर्वेषां तस्यैव भावस्यालम्बनं न भवेत् तावत्तस्मिन् रसोद्बोधनस्य समग्रा शक्तिर्नायाति। एतेनैव रुपेण तदानयनमस्माकं साधारणीकरण मित्युच्यते। काव्यस्य विषयः सदा विशषो भवति न सामान्यम्, तद् व्यक्तिमुपस्थापयति न जातिम्।साधारणीकरणस्यायमभिप्रायो यत्पाठकस्य श्रोतुर्वा मनसि योव्यक्तिविशेषो वस्तुविशेषो वाऽऽयाति, स यथा काव्योपवर्णितस्याश्रयगतभावस्यालम्बनं भवति, तथैव सकलसहृदयानां–पाठकश्रोतृणां–भावस्याप्याकलम्बनं भवेत्।यं व्यक्तिविशेषं प्रति कस्यचिद्भावस्य व्यञ्जनां कविः पात्रं वा करोति, पाठकस्य श्रोतुर्वा कल्पनायां स व्यक्तिविशेष एवोपतिष्ठते।कल्पनायां मूर्तिस्तु विशेषस्यैव भवति, परं सा मूर्तिरेतादृशी भवति या प्रस्तुतभावस्यालम्बनं भवेत, या तमेव भावं पाठकस्य श्रोतुर्वा मनस्यपि जागरयेत्। यं तदाश्रयः कविर्वा व्यञ्जयति। एतेन सिद्धं यत्साधारणीकरणमानम्बनत्वधर्मस्य भवति।व्यक्तिस्तु विशेष एव भवति, परं तत्रैतादृशः सामान्यधर्मस्य प्रतिष्ठा भवति। यस्य साक्षात्कारेण सर्वेषां श्रोतृणां

पाठकानां वा मनस्येक स्यैव भावस्योदयो नैयून्याधिक्येन भवति। 'विभावादयः सामान्येन प्रतीयन्ते'इत्यस्यैतत्तात्पर्यं यद्रसमग्नस्य पाठकस्य मनस्ययं भेदभावो न भवति यदिदं ममालम्बनं परस्य वेति। तत्कालं पाठकस्य श्रोतुर्वा हृदयं लोकसामान्यहृदयीभवति।साधारणीकरणे आलम्बनद्वारा भावानुभूतिः प्रथमं कवेर्भवेत् ततस्तद्वर्णितपात्रस्य ततश्चैव श्रोतुः पाठकस्य वा। विभावेन साधारणीकरणमिति यदुच्यते तत्तदेव चरितार्थतामेति।एतेषामुद्धरणानामाधारेण कतिचन तथ्यानि प्रकाश्यन्ते—साधारणीकरणविवेचनक्षणे भट्टनायकाभिनवगुप्तयोरभिमतानि शुक्लसमक्षं नासन्, केवलं विश्वनाथस्यैव मतमासीत्। तस्यापि तेन शास्त्रीयं विवेचनमकृत्वा केवलं स्वतन्त्रचिन्तनस्य स्वसिद्धान्तस्य वानुकूलं प्रयोगमात्रं कृतम्। प्रथमं तथ्यं शुक्लस्य सामायिकी परिसीमां द्योतयति, द्वितीयञ्च तस्य मौलिकीं प्रतिभाम्।रसमूलतः आलम्बनस्य साधारणीकरणं मन्यते। भावस्य विषय इत्यालम्बनम् तस्य साधारणीकरणे पूर्वं स कविभावस्य विषयो भवति, ततश्चैव सकलसहृदयसमाजभावस्य।आलम्बनसाधारणीकरणेन तद्व्यक्तित्वतिरोभावो नेष्यते, तद्व्यक्तिरभूत्वा जातिर्भवतीति। तद्व्यक्तित्वं तु तिष्ठति परं तत्र केषाञ्चिदीदृशां गुणानां समावेशो भवति, येन तत्सकलसहृदयसमाजस्य तद्भावविषयतामेति। सीता कामिनीत्येवावशिष्यत इत्यर्थः।इति न मन्तव्यम्। अपि तु सा सीतैव स्वशीलसौन्दर्यादिगुणैः सर्वेषां प्रेम्णो विषयीभवति। 'आलम्बनस्य व्यक्तित्वमपि तिष्ठेत, साधारणीकरणमपि स्यात्' इत्यसंगतिं समाधातुं शुक्लः स्वमूलस्थापनायां किञ्चित्संशोधनमुपस्थापयति यत्साधारणीकरणं वस्तुतः आलम्बनधर्मस्य भवति, तेषां सामान्यगुणानामेव यैः सीता रामस्य प्रियाऽभूत्। अत्रानेके विचारा प्रतिनिविशन्ते-सीता न केवलकामिनी (जातिः) सा व्यक्तिः सा रामप्रिया। किन्तु रामप्रियताधारास्तस्याः शीलसौन्दर्यादयः ईदृशः सामान्यगुणाः सन्ति, ये सकलहृदयसमाजस्य रतिभावमुत्पादयन्ति ।सीताराम प्रियास्ति, प्रियताधारस्तु सीतायाः सामान्यगुणा एव सन्ति, अतस्ते सकलसहृदयसमाजस्यापि प्रियाः सन्ति। सहृदयसमाजस्यापि शीलसौन्दर्यादयो गुणा इत्यर्थः। शुक्लसमक्षं वस्तुतः स्वसिद्धान्तद्वयसामञ्जस्यस्थापनसमस्यां समुपस्थिता। काव्यस्य विषयः (आलम्बनम्) विशेषो भवति। काव्यस्यास्वादश्चैव भावसामान्यभूमिकामधितिष्ठति। इयं समस्या तेन यथास्वबुद्धिबलोदयमेवं समाहितां। यद् आलम्बनवैशिष्ट्यं रक्षन् दक्षः कविः परीक्षितालोकहृदयः सामान्यगुणाधारेण तस्य साधारणीकरणं विदधाति। अन्ते सहृदयः सीतायामनुरज्यति, नोदेति च तस्य हृदये भेदभावो यथा सीता रामस्य प्रेमालम्बननं मम वेति। सहृदयहृदयं हि व्यक्ति चेतनामुक्तं भवति।

प्रथमं कविहृदये सीताविषयकोऽनुरागः समुदेति, स आश्रयद्वारेण तमभिव्यनक्ति, अन्ते च काव्यरसिकः सकलसहृदयसमाजस्तमनुरागभावमनुभवति। अभिनवगुप्त गुरोर्भट्टतोतस्यापीदमेव मतम्–'नायकस्य कवेः श्रोतुः समानोऽनुभवस्ततः।' इति।

शुक्लमतस्य कदाचिदयमेव सारः। अत्रास्माभिस्तन्मतस्पष्टीकरणाय प्रयत्नः समादृतः, तस्य सत्यासत्यत्वे पश्चान्निर्णेष्येते। इदं मतं भारतीयकाव्यशास्त्रस्वीकृतसिद्धान्तात्किञ्चिद्भिद्यते। अत एव संस्कृतशास्त्रविद्भिर्विद्भरिदमाक्षिप्तम्। पण्डितकेशवप्रसामिश्रो मतमिदं 'शुक्लभ्रम' इति संज्ञया ज्ञापयल्लिखति—साधारणीकरणेनात्र 'विभावानुभावादीनां साधारण्यकल्पनया पुरस्करणम्' इत्यर्थो गृहीतः। विभावानुभावादीनां साधारण्यस्य लोकसामान्यभावस्य वा द्वावर्थो सुग्रहौ। स्वरूपतः सामान्यभावस्याग्रहो नापपद्यते, तत्र हि विभावादयः सीमिताः श्रृंखलाबद्धा वा भवेयुः, काव्यस्य व्यापकत्वञ्च विनश्येत्। परिणामतोऽन्तिमध्येये सामान्यभाव (साधारणीकरण) स्वीकरणेऽपि द्वयो गतिः स्यात्। प्रथमा बौद्धिकी द्वैतवादिनी वा दृष्टिः, यत्र काव्यं नैतिकानैतिकद्वन्द्वान्तर्विलोक्यते नैतिकपक्षस्य च रसास्वादः क्रियते।। द्वितीया मनोवैज्ञानिकी ध्वन्यात्मिका कलात्मिका वा यत्र नैतिकताप्रश्नः पृथङ्नावतिष्ठते ध्वनावेवासितो भवति। अनयोः पूर्वा गतिर्भट्टनायकस्य भुक्तिवादेऽनुकूला, द्वितीया चाभिनवगुप्तस्य ध्वनिवादे। इदमनाक्ष्येयं यदुक्तो विद्वान् पूर्वगतिसमर्थकः, व यन्त्वाचार्याभिनवगुप्तमतानुयायिन इति। साधारणीकरणन्तु कविभावुकयोश्चित्तवृत्या सम्बध्यते, चित्तस्यैकाग्रये साधारणीकरणे च तस्य सर्वमपि साधारणं प्रतिभातीति। केशवेनान्ते स्वमतं सर्वथा विशदीकृतम्। स किलाभिनवगुप्तमतानुसारेण साधारणीकरणपदेन चित्तवृत्तीनां साधारणीकरणं मन्यत इति। सहृदयचित्तस्यैकाग्र्ये तस्य सर्व साधारणं प्रतिभातीति च। विभावस्य साधारणीकरणमसमग्रम्, समग्रं तु भावस्य साधारणीकरणमेव, वास्तविकञ्च। अभिनवः शैवाद्वैतसिद्धान्तेऽस्यामखण्डचेतनायामेव, साधारणीकरणमनुसंहितवान्। स्थायिभावस्य साधारणीकरणे बलाधानं विषयसत्ताया महत्वं प्रतिष्ठापयेत्। द्वैतस्य प्रतिष्ठायां द्वैतवादिरसकल्पनायाश्चाधारो बौद्धिको नैतिक एव वा स्यात्। इत्थं केशव आचार्यशुक्लस्य रसदृर्ष्टि द्वैतवादिनो भट्टनायकस्य भुक्तिवादेन सम्बद्धां प्रतिपाद्य तां तावतैवानुपातेन समग्राम्मन्यते। अभिनवानुसारेण रस आध्यात्मिकी प्रक्रियास्ति, केशवश्च तस्यामाध्यात्मिककल्पनायामेव रसदृष्टेः समग्रतां पश्यति। पदाक्षेप्यायं सारांशः विभावो बद्धः सीमितश्च, भावस्त्व मुक्तोऽसीमश्च। अतो विभावस्य साधारणीकरणमपूर्ण सीमितञ्च, तदिदं बौद्धिकं नैतिकञ्च। परं भावस्य साधारणीकरणं चित्तमुक्तिसंविद्विश्रान्त्योः पर्यायः पूर्णञ्च। पण्डितकेशवप्रसादमिश्रस्य विवेचनमतिसूक्ष्मं तात्त्विकञ्च। तेनाचार्यशुक्लस्य विभावनिष्ठदृष्टेर्नैतिकचेतनासम्बन्धस्य चोद्घाटनमतिमार्मिकं कृतम्, अन्ततश्च तस्या अभिनवगुप्ताद्वैतापेक्षया भट्टनायकद्वैतसिद्धान्तसन्निहितत्वं निरूपितम्। तथापि तस्य सर्वे निष्कर्षा यथावद् ग्राह्या न भवन्ति। इदं तावत्सत्यं यत्प्राचीनाचार्येषु भट्टनायकदृष्टेर्द्वैताधारतया विषयास्तित्वं स्वीकृतमभूतं, तेन हि सर्वतः प्रथमं रसास्वाद प्रसंगे नैतिकताप्रश्नः

समुत्थापितः, अतः संगतैवेयं कल्पना यत्तस्य दृष्टिराध्यात्मिकी शुद्धानन्दमयी वा न भूत्वा नैतिकताधृतास्ति । इमे चैतादृशे तत्वे शुक्लदृष्टावपि विद्येते ततस्तन्मतं भट्टनायकानुकूलमित्ययं निष्कर्षोऽपि नायथार्थः। परमस्ति भट्टनायकशुक्लमतयोरपि किञ्चिन्मिथोऽन्तरम्— यथा भट्टनायकेन विभावादीनां सर्वेषां साधारणीकरणं मन्यते। नालम्बनमात्रस्य। निजकान्तास्मृतिसत्वञ्च तेन रसास्वादप्रक्रियायां सर्वथैवास्वीकृतम्। परं शुक्लो विकल्पेनेदमपि मन्यते—'यद्यस्ति कस्यचित्पाठकस्य श्रोतुर्वा कचित्प्रेयसी, तदा श्रृंगाररसविकीर्णोक्तिश्रवणसमकालमाम्बनरूपेण तस्याः प्रेयस्या मितिरिव तत्कल्पनामधिष्ठास्यति, इति। भट्टनायकः करुणादीनां समेषामपि रसानामनुभूतिमानन्दमयीमेव मन्यते परं, शुक्लस्य रसकल्पना हृदयमुक्तावस्थायाः पर्यायः, स्व भट्टनायकस्य भावकत्वव्यापारजन्ये निजमोहसंकटतानिवारणे एव समाप्यते, न भोगान्तं गच्छति। पण्डितकेशवप्रसादमिश्रादनन्तरं विवेचनक्रमोयं प्राचलत्। डाक्टरगुलाबरायपण्डितरामदहिनमिश्रादयश्च प्रस्तुते प्रसंगे विस्तरेण स्वविचारान् प्रकाशयन्, किन्त्वमीषां विवेचनेषु विषयव्याख्यामात्रस्य प्राधान्यम्, न तु कस्यचिन्नूतनविचारोपस्थापनस्य। अस्य समग्रस्य विवेचनस्य सारांशोऽयम्——

रसस्य समेषामवयवानां विभावानुभावस्थायिसञ्चारिभावानां साधारणीकरणं भवति। साधारणीकरणप्रक्रियायां कश्चिदसंलक्ष्यक्रमो भवति। विभावादिसाधारणीकरणं पूर्वं, स्थायिभावस्य च पश्चात्तत्परिणामेन। अत्र भट्टनायकमते विषयविषयिणोरुभयोरपि पक्षयोः सन्तुलनमस्ति। मूलतो रसस्य विभावादीनां समेषामवयवानामेव साधारणीकरणं भवति, विभावादिसाधारणीकरणपरिणामेनैव च स्थायिभावसाधारणीकरणमपि। अतएवेदं निष्कृष्यते यत्साधारणीकरणं कवेर्निजानुभूतेरेव भवति। कश्चिवत्स्वानुभूतिं तथाऽभिव्यनक्ति यथा स सर्वेषां हृदये समामनुभूतिं जागरयेत्तदा पारिभाषिकशब्दावल्यां वयं ब्रूमः-'अस्त्यस्मिन् साधारणीकरणशक्तिः।' अनुभूतिः सर्वस्यैव भवति, सर्वश्च तां यत्किञ्चिद् व्यञ्जयति, परं साधारणीकरणशक्तिः सर्वस्य न भवति। अत एवानुभूत्यभिव्यक्त्योः सत्वेऽपि सर्वे कवयो न भवन्ति। स तु कविर्भवति यः स्वानुभूति साधारणीकर्तुं शक्नोति, शब्दान्तरेण वा 'यो लोकहृदयं जानाति स एव कविर्भवतीतिवक्तव्यम्। अत्रैत्य सर्वा बाधा निवर्तन्ते यथाश्रयस्य व्यक्तित्वमस्मद्विपरीतमस्ति नायको वास्माकं घृणाक्रोधयोर्विषयोऽस्ति किञ्चिदालम्बनं प्रति वाऽस्माकं भावविशेषोऽनुचित इति। आश्रयो रावणो यदि रामं भर्त्सयति यतः किम्? अस्माकं रसानुभूतौ कश्चिवद् बाधो नोपतिष्ठते। अस्मदन्तरंगे हि सैवानुभूतिर्जागरिष्यति, यां कविः प्रतीकेन अतएव साधारणीकरणस्याधारो भाषाया भावमयः प्रयोगोऽस्ति। स च प्रयोक्तुः स्वकीयां भावशक्तिमाश्रितः। प्रयोक्तुर्भावसंवेदनशक्तेः। प्रयोक्तुर्भावसंवेदनशक्तेश्चाधारो मानवसुलभा सहानुभूतिरस्ति।

भावशक्तिर्न्यूनाधिका वा सर्वत्र भवति। अतः साधारणीकरणस्यापि शक्तिः सर्वत्रास्ति, अन्यथा न सम्भवति जीवनस्थितिः। साधारणीकरणस्य विशेषशक्तिस्तु विशेषतः समृद्धभावशक्तावेव व्यक्तौ भवेत्, यदनुभूतयो विशेषाज्जागरूकाः स्युः। तादृश्येव व्यक्तिर्भावमयीं भाषां प्रयोक्तुमर्हति। प्रतीच्या विपश्चितोऽपि करुणादिरसास्वादे विचारं गम्भीरतया कुर्वन्तो दृश्यन्ते। दुःखात्मकानि दृश्याणि प्रेक्षकस्य हृदयमुद्वेजयन्ति उद्वेल्लयन्ति च इत्येतदादिकं वदन् रूसो वदति चाग्रे "—तत्र प्रेक्षको वाध्येता वा श्रोता द्वेषजन्यदृश्येषु आनन्दजन्यतामनुभवन्ति" तदितरे च विचारका आहुः—कारुणिकदृश्येषु मानवसहानुभूतिपरकं सुखं लभ्यते। परसहानुभूतिश्च वस्तु तस्त्वात्मसहानुभूतेरेव रूपम् इत्येतदादिविचाराः सन्ति 'शैले' इत्येतदाख्यस्य कवेः, फ्रांसदेशाधिवासिनो फान्तनेलस्य च। जर्मन्याश्च शापेनहारोऽपीदृशमेव विचारमभिव्यनक्ति। श्लेगेलो ब्रूते— ईदृशस्य दृशस्य दर्शनेन तस्याश्चेतनाया उदयो भवति यया ज्ञायते यत् पार्थिवस्य जीवनस्य सञ्चालनं कस्याश्चन अदृष्टशक्तेरधीनतायामस्ति, यस्याः पुरः पुरुषस्य समग्रापि शक्तिः क्षुद्रा वर्तते। अनया भावनया धारणया वा एकतोऽहङ्कारः शाम्यति, अपरतश्चैतया धारणया दुःखे-विपदि, धैर्यमवाप्यते।

निलकत्सनस्य मतेन कारुणिकेषु नाटकेषु मानवहृदयस्य शूरतोदारताप्रभृतिगुणानां प्रदर्शनं भवति। वीरताया श्लथत्वेऽपि गरिमैको निहित आप्यते। सः शोकस्य दिव्यया आभया भूषितो भवति। एतादृशे शोक-विपत्कालेऽस्मन्मानसे उदात्तानुभूतिः न च क्लेशजनिता भवति।

# संदर्भग्रंथाः


1-नाट्यशास्त्र :: 3:2

2-काव्यप्रकाश :: 1:3

4-रसगंगाधर :: 1:5

5-ईशवास्योपनिषद्::

6-साहित्यदर्पण :: 1:2

7-नाट्यशास्त्र :: 7:2

8-नाट्यशास्त्र :: 7::4:8

9-साहित्यदर्पण :: 3:1-20

10-साहित्यदर्पण :: 3:22